संस्पृशेत् शूद्रो योषिद्वापि कदाचन । स पतेन्नरके घोरे यावदाहूतसंप्लवम् । यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुन्धरे ! । दूरादेवास्पृशन् पूजां कारयेत् सुसमाहितः” । तत्पूजने तत्स्पर्शे च स्त्रीणां नाधिकार “न जातुचित् स्त्रिया: कार्यं शालग्रामस्य पूजनम् । भर्त्तृहीनाऽथ सुभगा स्वर्लोकाहितैषया । मोहात् स्पृशेत्तु महिला जन्मशीलगुणान्विता । हित्वा पुण्यसमूहं तु सत्वरं नरकं व्रजेत्” ब्रह्मवै० पा० २०अ० ।

“अभक्ष्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम् । शालग्रामशिलास्पर्शात् पावनं तत् भवेत् सदा” ।

“दद्यात् भक्ताय यो देवि ! शालग्रामशिलां नरः । सुवर्णसहितां, पृथ्वी सपर्वतवनान्विता । ससमुद्रा भवेद्दत्ता सत्पात्रे च वसुन्धरे ! । शालग्रामशिलायास्तु मूल्यमुद्घाटयेत् क्वचित् । विक्रेता क्रयकर्त्ता वा नरके वै पतेत् ध्रुवम्” वराहपु० ।

तस्याकारादिभेदे फलभेदो यथा

“छत्राकारे भवेद्राज्यं वर्त्तुले च लभेत् श्रियम् । दुःखञ्च शकटाकारे शूलाग्रे मरणं भवेत् । विकृतास्ये च दारिद्र्यं पिङ्गले हानिरेव च । लग्नचक्रे भवेद्व्याधिर्विदीर्णे मरणं ध्रुवम्” । तत्स्पर्शेन मिथ्यादिव्यादिकरणाद्दोषो यथा “शालग्रामशिलां धृत्वा मिथ्यावाक्यं वदेत्तु च । स याति कूर्मदंष्ट्रञ्च यावद्वै ब्रह्मणो वयः । शालग्रामशिलां धृत्वा स्वीकारं यो न पालयेत् । स प्रयात्यसिपत्रञ्च लक्षमन्वन्तरावधि । तुलसीपत्रविच्छेदं शालग्रामे करोति यः । तस्य जन्मान्तरे कान्ते ! स्त्रीविच्छेदो भविष्यति । शालग्रामञ्च तुलसीं शङ्खञ्चैकत्र एव च । यो रक्षति स च ज्ञानी स भवेत् श्रीहरिप्रियः” ब्रह्मवै०प्र० १६०अ० । “शालग्रामो हरेर्मूर्त्तिर्जगन्नाथश्च भारतम् । कलेर्दशसहस्रान्ते याति त्यक्ता हरेः पदम्” ब्रह्मवै०प्र० ६अ० । “शालग्रामाः समाः पूज्याः समेषु द्वितयं न हि । विषमा नैव पूज्याः स्युरेकैव विषमेष्वपि” पद्मपु०पा०२०अ० । “शालग्रामशिलारूपी यत्र तिष्ठति केशवः । तत्र देवाऽसुरा यक्षा भुवनानि चतुर्दश” पद्मपु० । “अत्र सर्वसान्निध्यादत्र तेषां पूजा प्रतीयते तत्रावाहनविसर्जने न स्तः “शालग्रामे स्थावरे वा नावाहनविसर्जने” इति राघवभट्टधृतवाक्यात्” दीक्षा० रघु० ।

३क्षेत्रभेदे न० तन्नामकारणं वराहपु० उक्तं यथा “अथ दीर्घेण कालेन स(शालङ्कायनः)मुनिः संशितव्रतः । तप्यमानो यथान्यायं पश्यते शालमुत्तमम् । विश्रामं कुरुते तत्र द्रष्टुकामोऽथ मां (हरिम्) मुनिः । मायया मम मूढात्मा शक्तो द्रष्टुं न मामभूत् । ततः पूर्वेण पार्श्वेन तस्य शालस्य सुन्दरि ! । वैशाखमासद्वादश्यां मद्दर्शनमुपागतः । दृष्ट्वा मां तत्र स मुनिस्तपस्वी संशितव्रतः । तुष्टाव वैदिकैः सूक्तैः प्रणम्य च पुनःपुनः । ततोऽहं स्तूयमानो वै ऋषिमुख्येन सुन्दरि ! । प्राप्तोऽस्मि परमां प्रीतिं तमवोचं ततो मुनिम् । अस्मिन्नाश्रमे महाभाग ! स्थित्वा त्वं तपसां निधे ! । पुत्रेण परमप्रीतो मत्क्षेत्रे मत्समो भव । अन्यच्च गुह्यं वक्ष्यामि शालङ्कायन ! तच्छृणु । तव प्रीत्या प्रवक्ष्यामि येनैतत् क्षेत्रमुत्तमम् । शालग्राममिति ख्यातं तन्निबोध मुने ! शुभम् । योऽयं वृक्षस्त्वया दृष्टः सोऽहमेव न संशयः” वराहपु० ।

**शालग्रामगिरि** पु० पर्वतभेदे वराहपु० “कथयिष्यामि ते गुह्यं शालग्राममिति स्मृतम् । तस्मिन् क्षेत्रे हरो देवो मत्स्वरूपेण संयुतः । शालग्रामे गिरौ तस्मिन् शिलारूपेण तिष्ठति । अहं तत्रैव तिष्ठामि शिलारूपेण नित्यदा । तस्मिन् शिलाः समस्तास्तु मत्स्वरूपा न संशयः । पूजनीयाः प्रयत्नेन किं पुनश्चक्रलाञ्छिताः । लिङ्गरूपेण तु हरस्तत्र देवालये गिरौ । शिवनाभाः शिलास्तत्र चक्रनाभास्तथा शिलाः । सोमेश्वराधिष्ठितस्तु शिवरूपो गिरिः स्मृतः । शालग्रामगिरिर्विष्णुरहं सोमेश्वराभिधः” वराहपु० ।

**शालङ्कायन** पु० ऋषिभेदे शालग्रामशब्दे दृश्यम् ।

**शा(सा)लज** पु० शा(सा)लात् जायते जन-ड । सर्जरसे (धुना) शब्दर० ।

**शालनिर्य्यास** पु० ६त० । सर्जरसे (धुना) रत्नमा० ।

**शालपर्णी** स्त्री शालस्येव पर्णान्यस्याः ङीप् । (शालपानी) वृक्षभेदे राजनि० । “शालपर्णी गरच्छर्द्दिज्वरश्वासातिसारजित् । शोषदोषत्रयहरी बृंहण्युक्ता रसायनी । तिक्ता विषहरी स्वादुः क्षतकासकृमिप्रणुत्” भावप्र० ।

**शालभञ्जिका** स्त्री शालेन भज्यते निर्मीयते भन्ज-ण्वुल् । १काष्ठनिर्मितपुत्तलिकायां, २वेश्यायाञ्च जटा० ।

**शालव** पु०शालः तन्नियांस इव वलति वहिर्गच्छति वल-ड । लोध्रे शब्दर० ।

**शालवेष्ट** पु० शालस्य वेष्ट इव । सर्जरसे (धुना) त्रिका० ।

**शालसार** पु० शालस्य सारः । १हिङ्गुनि शालेषु सारः । वृक्षश्रेष्ठे विष्णुः ।